# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा- शास्त्री | प्रश्नपत्रम् – ०५ | गुणाः – ७० |
| विषयः – साहित्यम् | सत्रम्- (२ ) | समयः- ०३ त: ०६ |
| दिनाङ्कः – ३१/०३/२०२० | सन्दर्भग्रन्थः – साहित्यदर्पण: | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** १०

१ विभावेनानुभावेन व्यक्त: संचारिणा तथा ।
रसतामेति रत्यादि: स्थायी भाव: सचेतसाम् ॥

२ करुणादावपि रासे जायते यत्परं सुखम् ।
सचेतसामनुभव: प्रमाणं तत्र केवलम् ॥

३ शिक्षाभ्यासादिमात्रेण राघवादे: सरूपताम् ।
दर्शयन्नर्तको नैव रसस्यास्वादको भवेत् ॥

**प्रश्न २ विश्वनाथस्य परिचयं विलिख्य कृतिपरिचयं लिखत ।** १०

**अथवा**

**नायकस्य लक्षणं विलिख्य मुख्यचतुर्णां नायकानां लक्षणोदाहरणानि लिखत ।**

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितेषु कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** १०

१ त्वरया हर्षरागादेर्दयितागमनादिषु ।
आस्थाने विभ्रमादीनां विन्यासो विभ्रमो मत: ॥

२ उक्ता: स्त्रीणामलंकारा अङ्गजाश्च स्वभावजा: ।
तद्रूपा: सात्त्विका भावा: तथा चेष्टा: परा अपि ॥

३ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ता: शमोऽपि च ॥

**प्रश्न ४ व्यभिचारिभावानां नामानि विलिख्य यथेच्छं द्वयं लक्षणोदाहरणसहितं विविच्यताम् ।** १०

**अथवा**

**सात्त्विकभावानां वर्णनं कुरुत ।**

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** **१०**

१ शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुक: ।
उत्तमप्रकृतिप्रायो रस: शृङ्गार उच्यते ॥

२ विकृताकारवाग्वेषचेष्टादे: कुहकाद् भवेत् ।
हास्यो हासस्थायिभाव: श्वेत: प्रमथदैवत: ॥

३ रौद्र: क्रोधस्थायिभाव: श्वेत: प्रमथदैवत: ।
आलम्बनमहिस्तत्र तच्चेष्टोद्दीपनं मतम् ॥

**प्रश्न ६ शृङ्गाररसं वर्णयन्तु ।** **१०**

**अथवा**

**हास्यरसं विश्वनाथमतानुसारं लिखत ।**

## संयुक्तान्वितय: (Unit 1-3)

**प्रश्न ७ दशानां प्रश्नानां लघूत्तराणि लिखत ।** **१०**

१ साहित्यदर्पणस्य रचयिता क: ?
२ तृतीयपरिच्छेदस्य नाम किम् ?
३ नायिकाया: आहत्य कति भेदा: ?
४ नायकस्य आहत्य कति भेदा: ?
५ श्रीराम: कीदृश: नायक: ?
६ दूतस्य कति प्रकारा: ?
७ कति रसा: ?
८ कति व्यभिचारिभावा: ?
९ शृङ्गाररसस्य स्थायिभाव: क: ?
१० करुणरसस्य क: वर्ण: ?
११ क्रोधस्थायिभावस्य रस: क: ?
१२ भयानकरसस्य स्थायिभाव: क: ?
१३ हास्यरसस्य स्थायिभाव: क: ?
१४ शम: कस्य रसस्य स्थायिभाव: ?
१५ सत्त्वस्य किं लक्षणम् ?

*************************